प्रयत्नं कुर्व्वीत यानशय्यासनाशनैः” मनुः “अशन-पते ! अशनस्य नोदेहि” शत० ब्रा०।

**अशनपर्णी** स्त्री अशनस्य पीतशालस्य पर्णमिव पर्णमस्याः। (आराटो) इति ख्याते वृक्षभेदे सा हि पीतशालतुल्यपर्णा।

**अशना** स्त्री अशनमिच्छति–अशन+क्यच् क्विप्। भोजनेच्छायाम्। शसाद्यचि अशन इत्यादि। “अशनापिपासे सौम्य ! विजानीहि” छा० उ०।

**अशनाया** स्त्री अशनमिच्छति अशन+क्यच्-स्त्रियाम् भावे अ। भोजनेच्छायाम्। “क्षुताशनायः फलवद्विभूत्या” भट्टिः “अन्नाद्वा अशनाया निवर्त्तते पानात् पिपासा” शत० ब्रा०।“अशनाययाशनाया हि मृत्युस्तन्मनोऽकुरुत” वृ० उ०।

**अशनायित** त्रि० अशनमिच्छति अशन+क्यच्-कर्त्तरि क्त। १भोजनेच्छावति क्षुधिते। भावे क्त। २भोजनेच्छायां न०

**अशनायुक** त्रि० अशनमिच्छति अशन+क्यच्-उकञ्, उन् स्वार्थे कन् वा। भोजनाभिलाषुके।“अन्नमेव तन्मध्यतो धीयते ऽशनायुको यजमानो भवत्यशनायुकाः प्रजाः” ता० ब्रा०।

**अशनि** पुं० स्त्री अश्नुते संहन्ति अश-अनि। १मेघोत्पन्ने १ज्योतिषि २इन्द्रे “स्तनयित्नुरेवेन्द्रो यज्ञः प्रजापतिः कतमः स्तनयित्नुरशनिः” शत० ब्रा० शत्रुघातके ३अनुयाजे “अशनिरेव प्रथमोऽनुयाज” इत्युपक्रम्य “अशनिरिन्द्रोऽवहन्ति” शत० ब्रा० ४इन्द्रास्त्रे वज्रे, प्रस्तरवर्षिणि ५उल्काविशेषे, ६विद्युति च। “अशनेरमृतस्य चोभयोर्वशिनश्चाम्बुधराश्च योनयः कुमा० ७अग्नौ ८विद्युदग्नौ “तमब्रवीदशनिरसीति तद्यदस्य तन्नामाकरोद्विद्युत्तद्रूपमभवद्विद्युद्वा अशनिस्तस्माद्यं विद्युद्धन्त्यशनिरबधीदित्याहुः” शत० ब्रा०। वज्रं च वृत्रासुरबधार्थमिन्द्रेण दधीचोऽस्थीनि गृहीत्वा विश्वकर्म्मणा कारितमिति भाग० ६स्क०। “मघवन् ! याहि भद्रं वो दध्यञ्चमृषिसत्तमम्। विद्याव्रततपःसारं गात्रं याचत मा चिरम्। स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्। यद्वा अश्वशिरोनाम तयोरमरतां व्यधात्। दध्यङ्ङाथर्व्वणस्त्वष्ट्रे वर्म्माभेद्यं मदात्मकम्। विश्वरूपाय यत् प्रादात्त्वष्टा यत्त्वमधास्ततः। युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गं स दास्यति”। ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्म्मितः। येन वृत्रशिरो हर्त्ता मत्तेजउपवृंहितः”। इति विष्णुनोक्ते नेन्द्रेण तथा कृते स आह “तयाभियाचितो देवैऋषिराथर्वणो महान्। मोदमान उवाचेदं प्रहसन्निव भारत !। अपि वृन्दारकायूयं न जानीत शरीरिणाम्। संस्थायां यस्त्वभिद्रोहो दुःसहश्चेतनापहः। जिजीविषूणां जीवानामात्मा प्रेष्ठइहेप्सितः। कउत्सहेत तं दातुं भिक्षमाणाय विष्णवे” इति दधीचोक्ते देवैः पुनरुक्तम् यथा “किं नु तद्दुस्त्यजं ब्रह्मन् ! पुंसां भूतानुकम्पिनाम्। भवद्विधानां महतां पुण्यश्लोकैककर्मणाम्। नूनं स्वार्थपरोलोको न वेद परसङ्कटम्। यदि वेद न याचेत नेति नाह यदीश्वरः। इत्युक्ते दधीचोक्तम् ‘धर्मं वःश्रोतुकामेन यूयं मे प्रत्युदाहृताः। एष वः प्रियमात्मानं त्यजन्तं सन्त्यजाम्यहम्। योऽध्रुवेणात्मना नाथा ! न धर्मं न यशः पुमान्। ईहेत भूतदयया स शोच्यः स्थावरैरपि। एतावानव्ययोधर्म्मः पुण्यश्लोकैरुपासितः। योभूतशोकहर्षाभ्यामात्मा शोचति हृष्यति। अहो दैन्यमहोकष्टं पारक्यैः क्षणभङ्गुरैः। यन्नोपकुर्य्यादस्वार्थैर्मर्त्यः स्वज्ञातिविग्रहैः। श्रीवादरायणिरुवाच। “एवं कृतव्यवसितो दध्यङ्ङाथर्व्वणस्तनुम्। परे भगवति ब्रह्मण्यात्मानं सन्नयन् जहौ। यताक्षासुमनोबुद्धिस्तत्त्वदृग् ध्वस्तबन्धनः। आस्थितः परमं योगं न देहं बुबुधे-प्सितम्। अथेन्द्रो वज्रमुद्यम्य निर्म्मितं विश्वकर्म्मणा। मुनेः शक्तिभिरुत्सिक्तं भगवत्तेजसान्वितम्”।

**अशब्द** त्रि० नास्ति शब्दो, वेदादौ वाचकशब्दो वा यस्य। १शब्दहीने, वेदे २वाचकशब्दवर्ज्जिते प्रधाने “ईक्षतेर्नाशब्दमिति” शारीरकसूत्रम् ३शब्दादिगुणहीने ब्रह्मणि च न० “अशब्दमस्पर्शमरूपमव्ययमिति” श्रुतिः

**अशरीर** त्रि०नास्ति शरीरं तदभिमानो वा यस्य।“प्रत्यग्ज्ञान शिखिध्वस्ते मिथ्याज्ञाने सहेतुके। नेतिनेतिस्वरूपत्वादशरीरो भवत्ययम्” इत्युक्तलक्षणे सकलनिषेधरूपे १परमात्मनि,२शरीराभिमानशून्ये जीवन्मुक्ते“अशरीरं वा वसन्त” प्रियाप्रिये न स्पृशतः” इति श्रुतिः। ३देहशून्ये ४मीमांसकोक्ते देवे ५ईश्वरे च परमात्मस्वरूपत्वात् ईश्वरस्याशरीरत्वम् “तदैक्षत बहु स्यां प्रजायेति श्रुत्या तस्येक्षितृत्वं यदुक्तं तदसङ्गतं शरीरं विना ज्ञानानुपपत्ते रित्याशङ्कापूर्व्वकं शा० भा० तत् समर्थितं यथा “प्रागुत्पत्तेर्ब्रह्मणः शरीरादिसंबन्धमन्तरेणेक्षितृत्वमनुपपन्नमिति न तच्चोद्यमवतरति सवितृप्रकाशवत् ब्रह्मणोज्ञानस्वरूपनित्यत्वेन ज्ञानसाधनापेक्षानुपपत्तेः। अपि च अविद्यादिमतः संसारिणः शरीराद्यपेक्षा ज्ञानोत्पत्तिः स्यात् न ज्ञानप्रतिबन्धकारणरहितस्येश्वरस्य। मन्त्रौ चैतावीश्वरस्य शरीराद्यनपेक्षतामनावरणज्ञानतां च दर्शयतः।“न तस्य कार्य्यं करणञ्च विद्यते न